# shrIguhyanAmauchChiShTagaNeshAnasahasranAmAvaliH

# શ્રીગુહ્યનામૌચ્છિષ્ટગણેશાનસહસ્રનામાવલિઃ

## Document Information

Text title : guhyanAma uchChiShTagaNeshasahasranAmAvalI

File name : guhyagaNeshasahasranAmAvalI.itx

Category : sahasranAmAvalI, ganesha

Location : doc_ganesha

Author : Traditional

Proofread by : krishna vallapareddy krishna321 at hotmail.com

Description-comments : Vighneshvara stutimanjari Vol 3, page 489, Ed. S.V.Radhakrishnashastri

Source : uDDAmaheshvaratantra

Latest update : December 1, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 24, 2023

*sanskritdocuments.org*

shrIguhyanAmauchChiShTagaNeshAnasahasranAmAvaliH

# શ્રીગુહ્યનામૌચ્છિષ્ટગણેશાનસહસ્રનામાવલિઃ

॥ શ્રીઃ ॥

ॐ શ્રીગણેશાય નમઃ ।
(વિશેષવિધિસ્તુ) સર્વત્રાદૌ ॐ આં ક્રોં હ્રીં ક્લીં હ્રીં ગ્લૌં
ગં ઇતિ અષ્ટતારીસંયોજનમ્ મહાગણેશાનોપાસકૈઃ ॐ શ્રીં હ્રીં ક્લીં
ગ્લૌં ગં ઇતિ ષટ્તારીસંયોજનં સમત્રિંશદક્ષર શ્રીમદુચ્છિષ્ટગણેશાનોપાસકૈઃ
ॐ આં ક્રોં હ્રીં ગં ગ્લૌં ઇતિ ષટ્તારીસંયોજનં ચ કર્તવ્યમ્ ।
સર્વત્ર નમોન્તપ્રતિનામાન્તપ્રણવપલ્લવિતત્વમપિ ॥ )
Use the prefix of eight bIjamantras ॐ આં ક્રોં હ્રીં ક્લીં હ્રીં ગ્લૌં ગં
if you are a follower of Mahaganesha.
Use the prefix of six bIjamantras ॐ શ્રીં હ્રીં ક્લીં ગ્લૌં ગં
or ॐ આં ક્રોં હ્રીં ગં ગ્લૌં
if you are a follower of Uchchishtaganapati. namaH follows for all names.
(For any general devotee, use only OM as given below.)

ॐ મહાગણાધિનાથાખ્યાય નમઃ ।
ॐ અષ્ટાવિંશત્યક્ષરાત્મકાય નમઃ ।
ॐ તારશ્રીશક્તિકન્દર્પભૂસ્મૃતિબિન્દુસંયુતાય નમઃ ।
ॐ ઙેન્તગણપતિપ્રોક્તાય નમઃ ।
ॐ વરવરદસંયુતાય નમઃ ।
ॐ સર્વજનદ્વિતીયાન્તાય નમઃ ।
ॐ આદિત્યશિવસંયુતાય નમઃ ।
ॐ વશમાનયસંયુક્તાય નમઃ ।
ॐ વહ્નિજાયાસમર્પિતાય નમઃ ।
ॐ ગણકમુનિસન્દૃષ્ટાય નમઃ । ૧૦
ॐ નિચૃદ્ગાયત્રભાષિતાય નમઃ ।
ॐ સુરાદિવન્દ્યપાદાબ્જાય નમઃ ।

ૐ મનુરાજવિજૃમ્ભિતાય નમઃ ।
ૐ ઇક્ષુસાગરમધ્યસ્થાય નમઃ ।
ૐ રત્નદ્વીપસ્ય મધ્યગાય નમઃ ।
ૐ તરઙ્ગમાલિકાધૌતશીતતરામલાલયાય નમઃ ।
ૐ કલ્પપાદપસંશોભિમણિભૂમિવિરાજિતાય નમઃ ।
ૐ મૃદુવાતસમાનીતદિવ્યગન્ધનિષેવિતાય નમઃ ।
ૐ નાનાકુસુમસઙ્કીર્ણાય નમઃ ।
ૐ પક્ષિવૃન્દરવપ્રિયાય નમઃ । ૨૦
ૐ યુગપદૃતુષટકેન સંસેવિતપદદ્વયાય નમઃ ।
ૐ નવરત્નસમાવિદ્ધસિંહાસનસમાસ્થિતાય નમઃ ।
ૐ જપાપુષ્પતિરસ્કારિરક્તકાન્તિસમુજ્જ્વલાય નમઃ ।
ૐ વલ્લભાશ્લિષ્ટવામાઙ્ગાય નમઃ ।
ૐ એકાદશકરાન્વિતાય નમઃ ।
ૐ રત્નકુમ્ભાઢ્યશુણ્ડાગ્રાય નમઃ ।
ૐ બીજાપૂરિણે નમઃ ।
ૐ ગદાધરાય નમઃ ।
ૐ ઇક્ષુચાપધરાય નમઃ ।
ૐ શૂલિને નમઃ । ૩૦
ૐ ચક્રપાણયે નમઃ ।
ૐ સરોજભૃતે નમઃ ।
ૐ પાશિને નમઃ ।
ૐ ધૃતોત્પલાય નમઃ ।
ૐ શાલીમઞ્જરીભૃતે નમઃ ।
ૐ સ્વદન્તભૃતે નમઃ ।
ૐ પઞ્ચાવરણચક્રેશાય નમઃ ।
ૐ ષડામ્નાયપ્રપૂજિતાય નમઃ ।
ૐ મૂલમન્ત્રાઢ્યપૂજાકાય નમઃ ।
ૐ ષડઙ્ગપરિવારિતાય નમઃ । ૪૦
ૐ પરૌઘપૂજનાતુષ્ટાય નમઃ ।
ૐ દિવ્યૌઘાદિનિષેવિતાય નમઃ ।
ૐ શ્રીશ્રીપતિસન્તુષ્ટાય નમઃ ।
ૐ ગિરિજાતત્પતિપ્રિયાય નમઃ ।

ૐ રતિમન્મથસમ્પ્રીતાય નમઃ ।
ૐ મહીવરાહપૂજિતાય નમઃ ।
ૐ ઋદ્ધ્યામોદપ્રપૂજાકાય નમઃ ।
ૐ સમૃદ્ધિતત્પતિપ્રિયાય નમઃ ।
ૐ કાન્તિસુમુખસુપ્રીતાય નમઃ ।
ૐ મદનાવતિકદુર્મુખાય નમઃ । ૫૦
ૐ મદદ્રવાવિઘ્નપૂજ્યાય નમઃ ।
ૐ દ્રાવિણીવિઘ્નેકર્તૃકાય નમઃ ।
ૐ વસુધારાશઙ્ખપૂજ્યાય નમઃ ।
ૐ વસુમતિકપદ્મકાય નમઃ ।
ૐ બ્રાહ્મીપ્રિયાય નમઃ ।
ૐ ઈશ્વરીશાય નમઃ ।
ૐ કૌમારીસેવિતાઙ્ઘ્રિકાય નમઃ ।
ૐ વૈષ્ણવ્યર્ચિતપદ્દ્વન્દ્વાય નમઃ ।
ૐ વારાહીસેવિતાઙ્ઘ્રિકાય નમઃ ।
ૐ ઇદ્રાણીપૂજિતશ્રીકાય નમઃ । ૬૦
ૐ ચામુણ્ડશ્રિતપાદુકાય નમઃ ।
ૐ મહાલક્ષ્મીમહામાતૃસમ્પૂજિતપદદ્વયાય નમઃ ।
ૐ ઐરાવતસમારૂઢવજ્રહસ્તેન્દ્રપૂજિતાય નમઃ ।
ૐ અજોપરિસમારૂઢશક્તિહસ્તાગ્નિસેવિતાય નમઃ ।
ૐ મહિષારૂઢદણ્ડાઢ્યયમદેવપ્રપૂજિતાય નમઃ ।
ૐ નરારોહિખડ્ગહસ્તનિરૃત્યાશ્રિતપાદુકાય નમઃ ।
ૐ મકરવાહનારૂઢપાશાઢ્યવરુણાર્ચિતાય નમઃ ।
ૐ રુરોરુપરિસન્તિષ્ઠદ્ધ્વજાઢ્યશ્વસનાર્ચિતાય નમઃ ।
ૐ અશ્વવાહનશઙ્ખાઢ્યસોમદેવપ્રપૂજિતાય નમઃ ।
ૐ વૃષભવાહનારૂઢત્રિશૂલાઢ્યેશસેવિતાય નમઃ । ૭૦
ૐ પઞ્ચાવરણપૂજોદ્યત્કારુણ્યાકુલમાનસાય નમઃ ।
ૐ પઞ્ચાવૃતિનમસ્યાકભક્તવાઞ્છાપ્રપૂરણાય નમઃ ।
ૐ એકમૂર્તયે નમઃ ।
ૐ અષ્ટમૂર્તયે નમઃ ।
ૐ પઞ્ચાશન્મૂર્તિભેદકાય નમઃ ।
ૐ બ્રહ્મચારિસમાખ્યાકાય નમઃ ।

ૐ પત્નીસંયુતમૂર્તિકાય નમઃ ।

ૐ નગ્નપત્નીસમાશ્લિષ્ટાય નમઃ ।

ૐ સુરતાનન્દતુન્દિલાય નમઃ ।

ૐ સુમબાણેક્ષુકોદણ્ડપાશાઙ્કુશવરાયુધાય નમઃ । ૮૦

ૐ કામિનીચુમ્બનાયુક્તસદાલિઙ્ગનતત્પરાય નમઃ ।

ૐ અણ્ડકર્ણકપોલાખ્યત્રિસ્થાનમદવારિરાજે નમઃ ।

ૐ મદાપોલુબ્ધમધુપૈર્વિચુમ્બિતકપોલકાય નમઃ ।

ૐ કામુકાય નમઃ ।

ૐ કામિનીકાન્તાય નમઃ ।

ૐ કાન્તાધરમધુવ્રતાય નમઃ ।

ૐ કામિનીહૃદયાકર્ષિણે નમઃ ।

ૐ વશાગણનિષેવિતાય નમઃ ।

ૐ ઐરાવતાદિદિઙ્નાગમિથુનાષ્ટકપૂજિતાય નમઃ ।

ૐ સદા જાયાશ્રિતાય નમઃ । ૯૦

ૐ અશ્રાન્તાય નમઃ ।

ૐ નગ્નોપાસકપૂજિતાય નમઃ ।

ૐ માંસાશિને નમઃ ।

ૐ વારુણીમત્તાય નમઃ ।

ૐ મત્સ્યભુજે નમઃ ।

ૐ મૈથુનપ્રિયાય નમઃ ।

ૐ મુદ્રાસમકસમ્પ્રીતાય નમઃ ।

ૐ મપઞ્ચકનિષેવિતાય નમઃ ।

ૐ પઞ્ચાઙ્ગરાગસુપ્રીતાય નમઃ ।

ૐ શૃઙ્ગારરસલમ્પટાય નમઃ । ૧૦૦

ૐ કર્પૂરવીટીસૌગન્ધ્યકલ્લોલિતકકુપ્તટાય નમઃ ।

ૐ ઉપાસકવરિષ્ઠાસ્યવીટ્યામૌઢ્યનિરાસકાય નમઃ ।

ૐ યોન્યાહિતસુશુણ્ડાકાય નમઃ ।

ૐ યોનિલાલનલાલસાય નમઃ ।

ૐ ભગામોદસમાશ્વાસિને નમઃ ।

ૐ ભગચુમ્બનલમ્પટાય નમઃ ।

ૐ કાન્તાકુચસમાલિઙ્ગિશુણ્ડામણ્ડિતવિગ્રહાય નમઃ ।

ૐ ઉચ્છિષ્ટાખ્યગણેશાનાય નમઃ ।

ૐ ઉચ્છિષ્ટાસ્વાદિસિદ્ધિદાય નમઃ ।

ૐ ઉચ્છિષ્ટપૂજનરતાય નમઃ । ૧૧૦

ૐ ઉચ્છિષ્ટજપસિદ્ધિદાય નમઃ ।

ૐ ઉચ્છિષ્ટહોમસમ્પ્રીતાય નમઃ ।

ૐ ઉચ્છિષ્ટવ્રતધારકાય નમઃ ।

ૐ ઉચ્છિષ્ટતર્પણપ્રીતાય નમઃ ।

ૐ ઉચ્છિષ્ટમાર્જને રતાય નમઃ ।

ૐ ઉચ્છિષ્ટબ્રાહ્મણકુલસન્તર્પણસુસાધિતાય નમઃ ।

ૐ ઉચ્છિષ્ટવિઘ્નરાજેન્દ્રાય નમઃ ।

ૐ ઉચ્છિષ્ટવસ્તુપૂજિતાય નમઃ ।

ૐ ઉચ્છિષ્ટમન્ત્રસઞ્જાપિસર્વસિદ્ધિપ્રકાશકાય નમઃ ।

ૐ ઉચ્છિષ્ટોપચારરતાય નમઃ । ૧૨૦

ૐ ઉચ્છિષ્ટોપાસ્તિસિદ્ધિદાય નમઃ ।

ૐ મદિરાનન્દસન્તોષિણે નમઃ ।

ૐ સદામત્તાય નમઃ ।

ૐ મદોદ્ધતાય નમઃ ।

ૐ મધુરાશિને નમઃ ।

ૐ મધૂદ્રિક્તાય નમઃ ।

ૐ મધુપાનપરાયણાય નમઃ ।

ૐ મધુસ્નાનપરામોદાય નમઃ ।

ૐ માધુર્યૈકરસાશ્રયાય નમઃ ।

ૐ મદિરાસિન્ધુસમ્ભૂતાય નમઃ । ૧૩૦

ૐ સુધામજ્જનતત્પરાય નમઃ ।

ૐ મદિરામ્બુધિસંસ્થાયિને નમઃ ।

ૐ મદિરામજ્જને રતાય નમઃ ।

ૐ મદિરાતર્પણપ્રીતાય નમઃ ।

ૐ મદિરામાર્જનાદૃતાય નમઃ ।

ૐ મદિરામોદસન્તોષિણે નમઃ ।

ૐ મદિરામોદલોલુપાય નમઃ ।

ૐ કાદમ્બરીરસોન્મત્તાય નમઃ ।

ૐ કાદમ્બરીપ્રિયાશ્રિતાય નમઃ ।

ૐ દ્રાક્ષારસસમાહ્લાદિને નમઃ । ૧૪૦

ૐ દ્રાક્ષારસમદોલ્વણાય નમઃ ।
ૐ વારુણીમદઘૂર્ણામ્બાય નમઃ ।
ૐ વારુણીમદવિહ્વલાય નમઃ ।
ૐ નારિકેલરસાસ્વાદિને નમઃ ।
ૐ નારિકેલમધુપ્રિયાય નમઃ ।
ૐ તાલફલરસોન્મત્તાય નમઃ ।
ૐ તાલમદ્યપરાયણાય નમઃ ।
ૐ પાનસમદ્યસુપ્રીતાય નમઃ ।
ૐ કદલીમદ્યપાનકાય નમઃ ।
ૐ દાડિમીરસસમ્પ્રીતાય નમઃ । ૧૫૦
ૐ ગૌડપાનકલમ્પટાય નમઃ ।
ૐ પૌષ્પીપાનસદામત્તાય નમઃ ।
ૐ પૌષ્પીકરણ્ડમણ્ડિતાય નમઃ ।
ૐ યુવતીસુરતાસક્તાય નમઃ ।
ૐ યુવતીમણિતે રતાય નમઃ ।
ૐ મોદપ્રમોદકૃત્સઙ્ગાય નમઃ ।
ૐ ભૈરવાનન્દવત્સલાય નમઃ ।
ૐ શુક્લસેવ્યાય નમઃ ।
ૐ શુક્લતુષ્ટાય નમઃ ।
ૐ શુક્લસિદ્ધિવરપ્રદાય નમઃ । ૧૬૦
ૐ શુક્લધાતુમહઃપૂજ્યાય નમઃ ।
ૐ ઓજશ્શક્તિપ્રકાશનાય નમઃ ।
ૐ શુક્રાદિમાન્ત્રિકૈર્ધુર્યૈરર્ધરાત્રપ્રપૂજિતાય નમઃ ।
ૐ મુક્તકચ્છાય નમઃ ।
ૐ મુક્તકેશાય નમઃ ।
ૐ નગ્નકાન્તાસમાશ્રિતાય નમઃ ।
ૐ તામ્બૂલચર્વણાયુક્તાય નમઃ ।
ૐ કર્પૂરવીટિકામદાય નમઃ ।
ૐ કાન્તાચર્વિતતામ્બૂલરસાસ્વાદનલમ્પટાય નમઃ ।
ૐ વિશેષતઃ કલિયુગેસિદ્ધિદાય સુરપાદપાય નમઃ । ૧૭૦
ૐ મહાપદ્માદિખર્વાન્તનિધિપૌષ્કલ્યપોષકાય નમઃ ।
ૐ સ્વલ્પાયાસસુસમ્પ્રીતાય નમઃ ।

ॐ કલૌ તૂર્ણફલપ્રદાય નમઃ ।
ॐ પિતૃકાનનસંસ્થાયિને નમઃ ।
ॐ પિતૃકાનનસિદ્ધિદાય નમઃ ।
ॐ માચીપત્રસમારાધ્યાય નમઃ ।
ॐ બૃહતીપત્રતોષિતાય નમઃ ।
ॐ દૂર્વાયુગ્મનમસ્યાકાય નમઃ ।
ॐ ધુત્તૂરદલપૂજિતાય નમઃ ।
ॐ વિષ્ણુક્રાન્તસપર્યાકાય નમઃ । ૧૮૦
ॐ ગણ્ડલીપત્રસેવિતાય નમઃ ।
ॐ અર્કપત્રસુસંરાધ્યાય નમઃ ।
ॐ અર્જુનપત્રકપૂજિતાય નમઃ ।
ॐ નાનાપત્રસુસમ્પ્રીતાય નમઃ ।
ॐ નાનાપુષ્પસુસેવિતાય નમઃ ।
ॐ સહસ્રાર્ચનપૂજાયાંસહસ્રકમલપ્રિયાય નમઃ ।
ॐ પુન્નાગપુષ્પસમ્પ્રીતાય નમઃ ।
ॐ મન્દારકુસુમપ્રિયાય નમઃ ।
ॐ બકુલપુષ્પસન્તુષ્ટાય નમઃ ।
ॐ ધુત્તૂરસુમશેખરાય નમઃ । ૧૯૦
ॐ રસાલપુષ્પસંશોભિને નમઃ ।
ॐ કેતકીપુષ્પસુપ્રિયાય નમઃ ।
ॐ પારિજાતપ્રસૂનાઢ્યાય નમઃ ।
ॐ માધવીકુન્દતોષિતાય નમઃ ।
ॐ શમ્યાલઙ્કારસુપ્રીતાય નમઃ ।
ॐ મૃણાલપાટલીપ્રિયાય નમઃ ।
ॐ લક્ષપઙ્કજપૂજાયામણિમાદિપ્રસાધકાય નમઃ ।
ॐ સંહિતાપદપાઠાદિઘનાન્તજ્ઞાનદાયકાય નમઃ ।
ॐ અષ્ટાવધાનસન્ધાયિને નમઃ ।
ॐ શતાવધાનપોષકાય નમઃ । ૨૦૦
ॐ સાહસ્રિકાવધાનશ્રીપરિપાટીપ્રવર્ધનાય નમઃ ।
ॐ મનશ્ચિન્તિતવિજ્ઞાત્રે નમઃ ।
ॐ મનસા ચિન્તિતપ્રદાય નમઃ ।
ॐ ભક્તત્રાણવ્યગ્રચિત્તાય નમઃ ।

ૐ સ્મૃતિમાત્રાભયપ્રદાય નમઃ ।
ૐ સ્મૃતિમાત્રાખિલત્રાત્રે નમઃ ।
ૐ સાધકેષ્ટદતલ્લજાય નમઃ ।
ૐ સ્વસાધકવિપક્ષચ્છિદે નમઃ ।
ૐ વિપક્ષજનભક્ષકાય નમઃ ।
ૐ વ્યાધિહન્ત્રે નમઃ । ૨૧૦
ૐ વ્યથાહન્ત્રે નમઃ ।
ૐ મહાવ્યાધિવિનાશનાય નમઃ ।
ૐ પૈત્તિકાર્તિપ્રશમનાય નમઃ ।
ૐ શ્લૈષ્મિકસ્ય વિનાશકાય નમઃ ।
ૐ વાતિકજ્વરવિધ્વંસિને નમઃ ।
ૐ શૂલગુલ્માદિનાશનાય નમઃ ।
ૐ નેત્રરોગપ્રશમનાય નમઃ ।
ૐ નિત્યજ્વરવિનાશનાય નમઃ ।
ૐ કાસાદિવ્યાધિસંહર્ત્રે નમઃ ।
ૐ સર્વજ્વરવિનાશનાય નમઃ । ૨૨૦
ૐ આધિહન્ત્રે નમઃ ।
ૐ તમોહન્ત્રે નમઃ ।
ૐ સર્વાપદ્વિનિવારકાય નમઃ ।
ૐ ધનદાયિને નમઃ ।
ૐ યશોદાયિને નમઃ ।
ૐ જ્ઞાનદાયિને નમઃ ।
ૐ સુરદ્રુમાય નમઃ ।
ૐ કલ્પત્વદાયકાય નમઃ ।
ૐ ચિન્તામણયે નમઃ ।
ૐ આયુષ્યદાયકાય નમઃ । ૨૩૦
ૐ પરકાયપ્રવેશાદિયોગસિદ્ધિવિધાયકાય નમઃ ।
ૐ મહાધનિત્વસન્ધાત્રે નમઃ ।
ૐ ધરાધીશત્વદાયકાય નમઃ ।
ૐ તાપત્રયાગ્નિસન્તપ્તસમાહ્લાદનકૌમુદ્યૈ નમઃ ।
ૐ જન્મવ્યાધિજરામૃત્યુમહાવ્યાધિવિનાશકાય નમઃ ।
ૐ સંસારકાનનચ્છેત્રે નમઃ ।

ૐ બ્રહ્મવિદ્યાપ્રકાશકાય નમઃ ।
ૐ સંસારભયવિધ્વંસિપરાકામકલાવપુષે નમઃ ।
ૐ ઉચ્છિષ્ટાખ્યગણાધીશાય નમઃ ।
ૐ વામાચરણપૂજિતાય નમઃ । ૨૪૦
ૐ નવાક્ષરીમન્ત્રરાજાય નમઃ ।
ૐ દશવર્ણકમન્ત્રરાજે નમઃ ।
ૐ એકાદશાક્ષરીરૂપાય નમઃ ।
ૐ સપ્તવિંશતિવર્ણકાય નમઃ ।
ૐ ષટ્ત્રિંશદર્ણસમ્પૂજ્યાય નમઃ ।
ૐ બલિમન્ત્રપ્રપૂજિતાય નમઃ ।
ૐ દ્વાદશાક્ષરસન્નિષ્ઠાય નમઃ ।
ૐ એકોનવિંશતીષ્ટદાય નમઃ ।
ૐ સપ્તવર્ણાધિકત્રિંશદર્ણમન્ત્રસ્વરૂપકાય નમઃ ।
ૐ દ્વાત્રિંશદક્ષરારૂઢાય નમઃ । ૨૫૦
ૐ દક્ષિણાચારસેવિતાય નમઃ ।
ૐ પઞ્ચાવૃતિકયન્ત્રોદ્ધવરિવસ્યાવિધિપ્રિયાય નમઃ ।
ૐ નવવર્ણાદિમન્ત્રૌઘસમ્પ્રપૂજિતપાદુકાય નમઃ ।
ૐ પરૌઘીયગુરુવ્યૂહસન્તર્પણસુસાધિતાય નમઃ ।
ૐ મહત્પદસમાયુક્તપાદુકાપૂજનપ્રિયાય નમઃ ।
ૐ દક્ષિણાભિમુખેશસ્યપૂજનેન વરપ્રદાય નમઃ ।
ૐ દિવ્યવૃન્દસિદ્ધવૃન્દમાનવૌઘનિષેવિતાય નમઃ ।
ૐ ત્રિવારં મૂલમન્ત્રેણબિન્દુચક્રે સુતર્પિતાય નમઃ ।
ૐ ષડઙ્ગદેવતાપૂજ્યાય નમઃ ।
ૐ ષણ્મુખામ્નાયરાજિતાય નમઃ । ૨૬૦
ૐ તુષારસમશોભાકહૃદયામ્બાનમસ્કૃતાય નમઃ ।
ૐ સ્ફટિકાશ્મસમાનશ્રીશિરોદેવીનિષેવિતાય નમઃ ।
ૐ શ્યામશોભાસમુજ્જૃમ્ભિશિખાદેવીપ્રપૂજિતાય નમઃ ।
ૐ ઇન્દ્રનીલમણિચ્છાયકવચામ્બાપરીવૃતાય નમઃ ।
ૐ કૃષ્ણવર્ણસુશોભિશ્રીનેત્રમાતૃસમાવૃતાય નમઃ ।
ૐ આરુણ્યૌઘનદીમજ્જદસ્ત્રામ્બાસેવિતાઙ્ઘ્રિકાય નમઃ ।
ૐ વસુદલાબ્જમૂલેષુશક્ત્યષ્ટકસમન્વિતાય નમઃ ।
ૐ વિદ્યાપૂજ્યાય નમઃ ।

ૐ વિશ્વધાત્રીભોગદાર્ચિતપાદુકાય નમઃ ।
ૐ વિઘ્નનાશિકયા પૂજ્યાય નમઃ । ૨૭૦
ૐ નિધિપ્રદાપરીવૃતાય નમઃ ।
ૐ પાપઘ્નિકાપૂજ્યપાદાય નમઃ ।
ૐ પુણ્યાદેવીનિષેવિતાય નમઃ ।
ૐ અન્વર્થનામસંરાજિશશિપ્રભાપ્રપૂજિતાય નમઃ ।
ૐ દલાષ્ટકસ્ય મધ્યેષુસિદ્ધ્યષ્ટકપરીવૃતાય નમઃ ।
ૐ અણિમ્નીપૂજિતપદાય નમઃ ।
ૐ મહિમ્ન્યર્ચિતપાદુકાય નમઃ ।
ૐ લઘિમ્નીચિન્તિતપદાય નમઃ ।
ૐ ગરિમ્ણીપૂજિતાઙ્ઘ્રિકાય નમઃ ।
ૐ ઈશિત્વાર્ચિતદેવેન્દ્રાય નમઃ । ૨૮૦
ૐ વશિત્વાર્ચિતવૈભવાય નમઃ ।
ૐ પ્રાકામ્યદેવીસમ્પ્રીતાય નમઃ ।
ૐ પ્રાપ્તિસિદ્ધિપ્રપૂજિતાય નમઃ ।
ૐ બાહ્યાષ્ટદલરાજીવેવક્રતુણ્ડાદિરૂપકાય નમઃ ।
ૐ વક્રતુણ્ડાય નમઃ ।
ૐ એકદંષ્ટ્રાય નમઃ ।
ૐ મહોદરાય નમઃ ।
ૐ ગજાનનાય નમઃ ।
ૐ લમ્બોદરાખ્યાય નમઃ ।
ૐ વિકટાય નમઃ । ૨૯૦
ૐ વિઘ્નરાજે નમઃ ।
ૐ ધૂમ્રવર્ણકાય નમઃ ।
ૐ બહિરષ્ટદલાગ્રેષુબ્રાહ્મ્યાદિમાતૃસેવિતાય નમઃ ।
ૐ મૃગચર્માવૃતસ્વર્ણકાન્તિબ્રાહ્મીસમાવૃતાય નમઃ ।
ૐ નૃકપાલાદિસમ્બિભ્રચ્ચન્દ્રગૌરમહેશિકાય નમઃ ।
ૐ ઇન્દ્રગોપારુણચ્છાયકૌમારીવન્દ્યપાદુકાય નમઃ ।
ૐ નીલમેઘસમચ્છાયવૈષ્ણવીસુપરિષ્કૃતાય નમઃ ।
ૐ અઞ્જનાદ્રિસમાનશ્રીવારાહીપર્યલઙ્કૃતાય નમઃ ।
ૐ ઇન્દ્રનીલપ્રભાપુઞ્જલસદિન્દ્રાણિકાયુતાય નમઃ ।
ૐ શોણવર્ણસમુલ્લાસિચામુણ્ડાર્ચિતપાદુકાય નમઃ । ૩૦૦

ૐ સ્વર્ણકાન્તિતિરસ્કારિમહાલક્ષ્મીનિષેવિતાય નમઃ ।

ૐ ઐરાવતાદિવજાદિદેવેન્દ્રાદિપ્રપૂજિતાય નમઃ ।

ૐ પઞ્ચાવૃતિનમસ્યાયામણિમાદિપ્રકાશકાય નમઃ ।

ૐ સઙ્ગુપ્તવિદ્યાય નમઃ ।

ૐ સઙ્ગુપ્તવરિવસ્યાવિધિપ્રિયાય નમઃ ।

ૐ વામાચરણસુપ્રીતાય નમઃ ।

ૐ ક્ષિપ્રસન્તુષ્ટમાનસાય નમઃ ।

ૐ કોટ્ટાચલશિરોવર્તિને નમઃ ।

ૐ કોટ્ટાચલજનપ્રિયાય નમઃ ।

ૐ કોટ્ટામ્બુદજલાસ્વાદિને નમઃ । ૩૧૦

ૐ કાવેરીતીરવાસકાય નમઃ ।

ૐ જાહ્નવીમજ્જનાસક્તાય નમઃ ।

ૐ કાલિન્દીમજ્જને રતાય નમઃ ।

ૐ શોણભદ્રાજલોદ્ભૂતાય નમઃ ।

ૐ શોણપાષાણરૂપકાય નમઃ ।

ૐ સરય્વાપઃપ્રવાહસ્થાય નમઃ ।

ૐ નર્મદાવારિવાસકાય નમઃ ।

ૐ કૌશિકીજલસંવાસાય નમઃ ।

ૐ ચન્દ્રભાગામ્બુનિષ્ઠિતાય નમઃ ।

ૐ તામ્રપર્ણીતટસ્થાયિને નમઃ । ૩૨૦

ૐ મહાસારસ્વતપ્રદાય નમઃ ।

ૐ મહાનદીતટાવાસાય નમઃ ।

ૐ બ્રહ્મપુત્રામ્બુવાસકાય નમઃ ।

ૐ તમસાતમ આકારાય નમઃ ।

ૐ મહાતમોપહારકાય નમઃ ।

ૐ ક્ષીરાપગાતીરવાસિને નમઃ ।

ૐ ક્ષીરનીરપ્રવર્ધકાય નમઃ ।

ૐ કામકોટીપીઠવાસિને નમઃ ।

ૐ શઙ્કરાર્ચિતપાદુકાય નમઃ ।

ૐ ઋશ્યશૃઙ્ગપુરસ્થાયિને નમઃ । ૩૩૦

ૐ સુરેશાર્ચિતવૈભવાય નમઃ ।

ૐ દ્વારકાપીઠસંવાસિને નમઃ ।

ૐ પદ્મપાદાર્ચિતાઙ્ઘ્રિકાય નમઃ ।
ૐ જગન્નાથપુરસ્થાયિને નમઃ ।
ૐ તોટકાચાર્યસેવિતાય નમઃ ।
ૐ જ્યોતિર્મઠાલયસ્થાયિને નમઃ ।
ૐ હસ્તામલકપૂજિતાય નમઃ ।
ૐ વિદ્યાભોગયશોમોક્ષયોગલિઙ્ગપ્રતિષ્ઠિતાય નમઃ ।
ૐ પઞ્ચલિઙ્ગપ્રતિષ્ઠાયિને નમઃ ।
ૐ દ્વાદશલિઙ્ગસંસ્થિતાય નમઃ । ૩૪૦
ૐ કોલાચલપુરસ્થાયિને નમઃ ।
ૐ કામેશીનગરેશ્વરાય નમઃ ।
ૐ જ્વાલામુખીમુખસ્થાયિને નમઃ ।
ૐ શ્રીશૈલકૃતવાસકાય નમઃ ।
ૐ લઙ્કેશ્વરાય નમઃ ।
ૐ કુમારીશાય નમઃ ।
ૐ કાશીશાય નમઃ ।
ૐ મથુરેશ્વરાય નમઃ ।
ૐ મલયાદ્રિશિરોવાસિને નમઃ ।
ૐ મલયાનિલસેવિતાય નમઃ । ૩૫૦
ૐ શોણાદ્રિશિખરારૂઢાય નમઃ ।
ૐ શોણાદ્રીશપ્રિયઙ્કરાય નમઃ ।
ૐ જમ્બૂવનાન્તમધ્યસ્થાય નમઃ ।
ૐ વલ્મીકપુરમધ્યગાય નમઃ ।
ૐ પઞ્ચાશત્પીઠનિલયાય નમઃ ।
ૐ પઞ્ચાશદક્ષરાત્મકાય નમઃ ।
ૐ અષ્ટોત્તરશતક્ષેત્રાય નમઃ ।
ૐ અષ્ટોત્તરશતપૂજિતાય નમઃ ।
ૐ રત્નશૈલકૃતાવાસાય નમઃ ।
ૐ શુદ્ધજ્ઞાનપ્રદાયકાય નમઃ । ૩૬૦
ૐ શાતકુમ્ભગિરિસ્થાયિને નમઃ ।
ૐ શાતકુમ્ભોદરસ્થિતાય નમઃ ।
ૐ ગોમયપ્રતિમાવિષ્ટાય નમઃ ।
ૐ શ્વેતાર્કતનુપૂજિતાય નમઃ ।

ૐ હરિદ્રાબિમ્બસુપ્રીતાય નમઃ ।
ૐ નિમ્બબિમ્બસુપૂજિતાય નમઃ ।
ૐ અશ્વત્થમૂલસંસ્થાયિને નમઃ ।
ૐ વટવૃક્ષાધરસ્થિતાય નમઃ ।
ૐ નિમ્બવૃક્ષસ્ય મૂલસ્થાય નમઃ ।
ૐ પ્રતિગ્રામાધિદૈવતાય નમઃ । ૩૭૦
ૐ અશ્વત્થનિમ્બસંયોગેપ્રિયાલિઙ્ગિતમૂર્તિકાય નમઃ ।
ૐ ગમ્બીજરૂપાય નમઃ ।
ૐ એકાર્ણાય નમઃ ।
ૐ ગણાધ્યક્ષાય નમઃ ।
ૐ ગણાધિપાય નમઃ ।
ૐ ગ્લૈમ્બીજાખ્યાય નમઃ ।
ૐ ગણેશાનાય નમઃ ।
ૐ ગોઙ્કારાય નમઃ ।
ૐ એકવર્ણકાય નમઃ ।
ૐ વિરિરૂપાય નમઃ । ૩૮૦
ૐ વિઘ્નહન્ત્રે નમઃ ।
ૐ દૃષ્ટાદૃષ્ટફલપ્રદાય નમઃ ।
ૐ પત્નીવરાઙ્ગસત્પાણયે નમઃ ।
ૐ સિન્દૂરાભાય નમઃ ।
ૐ કપાલભૃતે નમઃ ।
ૐ લક્ષ્મીગણેશાય નમઃ ।
ૐ હેમાભાય નમઃ ।
ૐ એકોનત્રિંશદક્ષરાય નમઃ ।
ૐ વામાઙ્ગાવિષ્ટલક્ષ્મીકાય નમઃ ।
ૐ મહાશ્રીપ્રવિધાયકાય નમઃ । ૩૯૦
ૐ ત્ર્યક્ષરાય નમઃ ।
ૐ શક્તિગણપાય નમઃ ।
ૐ સર્વસિદ્ધિપ્રપૂરકાય નમઃ ।
ૐ ચતુરક્ષરશક્તીશાય નમઃ ।
ૐ હેમચ્છાયાય નમઃ ।
ૐ ત્રિણેત્રકાય નમઃ ।

ૐ ક્ષિપ્રપ્રસાદપઙ્ક્ત્યર્ણાય નમઃ ।

ૐ રક્તાભાય નમઃ ।

ૐ કલ્પવલ્લિભૃતે નમઃ ।

ૐ પઞ્ચવક્ત્રાય નમઃ । ૪૦૦

ૐ સિંહવાહાય નમઃ ।

ૐ હેરમ્બાય નમઃ ।

ૐ ચતુરર્ણકાય નમઃ ।

ૐ સુબ્રહ્મણ્યગણેશાનાય નમઃ ।

ૐ ધાત્વર્ણાય નમઃ ।

ૐ સર્વકામદાય નમઃ ।

ૐ અરુણાભતનુશ્રીકાય નમઃ ।

ૐ કુક્કુટોદ્યત્કરાન્વિતાય નમઃ ।

ૐ અષ્ટાવિંશતિવર્ણાત્મમન્ત્રરાજસુપૂજિતાય નમઃ ।

ૐ ગન્ધર્વસિદ્ધસંસેવ્યાય નમઃ । ૪૧૦

ૐ વ્યાઘ્રદ્વિપાદિભીકરાય નમઃ ।

ૐ મન્ત્રશાસ્ત્રમહોદન્વત્સમુદ્યતકલાનિધયે નમઃ ।

ૐ જનસમ્બાધસમ્મોહિને નમઃ ।

ૐ નવદ્રવ્યવિશેષકાય નમઃ ।

ૐ કામનાભેદસંસિદ્ધવિવિધધ્યાનભેદકાય નમઃ ।

ૐ ચતુરાવૃત્તિસન્તૃપ્તિપ્રીતાય નમઃ ।

ૐ અભીષ્ટસમર્પકાય નમઃ ।

ૐ ચન્દ્રચન્દનકાશ્મીરકસ્તૂરીજલતર્પિતાય નમઃ ।

ૐ શુણ્ડાગ્રજલસન્તૃપ્તિકૈવલ્યફલદાયકાય નમઃ ।

ૐ શિરઃકૃતપયસ્તૃપ્તિસર્વસમ્પદ્વિધાયકાય નમઃ । ૪૨૦

ૐ ગુહ્યદેશમધુદ્રવ્યસન્તૃપ્ત્યાકામદાયકાય નમઃ ।

ૐ નેત્રદ્વયમધુદ્રવ્યતૃપ્ત્યાકૃષ્ટિવિધાયકાય નમઃ ।

ૐ પૃષ્ઠદેશઘૃતદ્રવ્યતૃપ્તિભૂપવશઙ્કરાય નમઃ ।

ૐ એરણ્ડતૈલસન્તૃપ્તિરણ્ડાકર્ષકનાભિકાય નમઃ ।

ૐ ઊરુયુગ્મકતૈલીયતર્પણાતિપ્રમોદિતાય નમઃ ।

ૐ પ્રીતિપ્રવર્ધકાંસીયપયઃપયઃપ્રતર્પણાય નમઃ ।

ૐ ધર્મવર્ધકતુણ્ડીયદ્રવ્યત્રયસુતર્પણાય નમઃ ।

ૐ અષ્ટદ્રવ્યાહુતિપ્રીતાય નમઃ ।

ૐ વિવિધદ્રવ્યહોમકાય નમઃ ।
ૐ બ્રાહ્મમુહૂર્તનિષ્પન્નહોમકર્મપ્રસાદિતાય નમઃ । ૪૩૦
ૐ મધુદ્રવ્યકહોમેનસ્વર્ણસમૃદ્ધિવર્ધકાય નમઃ ।
ૐ ગોદુગ્ધકૃતહોમેનગોસમૃદ્ધિવિધાયકાય નમઃ ।
ૐ આજ્યાહુતિકહોમેનલક્ષ્મીલાસવિલાસકાય નમઃ ।
ૐ શર્કરાહુતિહોમેનકાષ્ઠાષ્ટકયશઃપ્રદાય નમઃ ।
ૐ દધિદ્રવ્યકહોમેનસર્વસમ્પત્તિદાયકાય નમઃ ।
ૐ શાલ્યન્નકૃતહોમેનાન્નસમૃદ્ધિવિતારકાય નમઃ ।
ૐ સતણ્ડુલતિલાહુત્યાદ્રવ્યકદમ્બપૂરકાય નમઃ ।
ૐ લાજાહુતિકહોમેનદિગન્તવ્યાપિકીર્તિદાય નમઃ ।
ૐ જાતીપ્રસૂનહોમેનમેધાપ્રજ્ઞાપ્રકાશકાય નમઃ ।
ૐ દૂર્વાત્રિકીયહોમેનપૂર્ણાયુઃપ્રતિપાદકાય નમઃ । ૪૪૦
ૐ સુપીતસુમહોમેનવૈરિભૂપતિશિક્ષકાય નમઃ ।
ૐ વિભીતકસમિદ્ધોમૈઃસ્તમ્ભનોચ્ચાટસિદ્ધિદાય નમઃ ।
ૐ અપામાર્ગસમિદ્ધૌમૈઃપણ્યયોષાવશઙ્કરાય નમઃ ।
ૐ એરણ્ડકસમિદ્ધોમૈઃરણ્ડાસઙ્ઘવશઙ્કરાય નમઃ ।
ૐ નિમ્બદ્રુદલહોમેનવિદ્વેષણવિધાયકાય નમઃ ।
ૐ ધૃતાક્તદૌગ્ધશાલ્યન્નહોમૈરિષ્ટફલપ્રદાય નમઃ ।
ૐ તિલાદિચતુરાહુત્યાસર્વપ્રાણિવશઙ્કરાય નમઃ ।
ૐ નાનાદ્રવ્યસમિદ્ધોમૈરાકર્ષણાદિસિદ્ધિદાય નમઃ ।
ૐ ત્રૈલોક્યમોહનાય નમઃ ।
ૐ વિઘ્નાય નમઃ । ૪૫૦
ૐ ત્ર્યધિકત્રિંશદર્ણકાય નમઃ ।
ૐ દ્વાદશાક્ષરશક્તીશાય નમઃ ।
ૐ પત્નીવરાઙ્ગહસ્તકાય નમઃ ।
ૐ મુક્તાચન્દ્રૌઘદીપ્તાભાય નમઃ ।
ૐ વિરિવિઘ્નેશપદ્ધતયે નમઃ ।
ૐ એકાદશાક્ષરીમન્ત્રોલ્લાસિને નમઃ ।
ૐ ભોગગણાધિપાય નમઃ ।
ૐ દ્વાત્રિંશદર્ણસંયુક્તાય નમઃ ।
ૐ હરિદ્રાગણપાય નમઃ ।
ૐ મહતે નમઃ । ૪૬૦

ॐ જગત્ત્રયહિતાય નમઃ ।

ॐ ભોગમોક્ષદાય નમઃ ।

ॐ કવિતાકરાય નમઃ ।

ॐ ષડર્ણાય નમઃ ।

ॐ પાપવિધ્વંસિને નમઃ ।

ॐ સર્વસૌભાગ્યદાયકાય નમઃ ।

ॐ વક્રતુણ્ડાભિધાય નમઃ ।

ॐ શ્રીમતે નમઃ ।

ॐ ભજતાં કામદાય મણયે નમઃ ।

ॐ મેઘોલ્કાદિમહામન્ત્રાય નમઃ । ૪૭૦

ॐ સર્વવશ્યફલપ્રદાય નમઃ ।

ॐ આથર્વણિકમન્ત્રાત્મને નમઃ ।

ॐ રાયસ્પોષાદિમન્ત્રરાજે નમઃ ।

ॐ વક્રતુણ્ડેશગાયત્રીપ્રતિપાદિતવૈભવાય નમઃ ।

ॐ પિણ્ડમન્ત્રાદિમાલાન્તસર્વમન્ત્રૌઘવિગ્રહાય નમઃ ।

ॐ સઞ્જપ્તિહોમસન્તૃપ્તિસેકભોજનસાધિતાય નમઃ ।

ॐ પઞ્ચાઙ્ગકપુરશ્ચર્યાય નમઃ ।

ॐ અર્ણલક્ષજપસાધિતાય નમઃ ।

ॐ કોટ્યાવૃત્તિકસઞ્જપ્તિસિદ્ધીશ્વરત્વદાયકાય નમઃ ।

ॐ કૃષ્ણાષ્ટમીસમારબ્ધમાસેનૈકેનસાધિતાય નમઃ । ૪૮૦

ॐ માતૃકયા પુટીકૃત્યમાસેનૈકેન સાધિતાય નમઃ ।

ॐ ભૂતલિપ્યા પુટીકૃત્યમાસેનૈકેન સાધિતાય નમઃ ।

ॐ ત્રિષષ્ટ્યક્ષરસંયુક્તમાતૃકાપુટસિદ્ધિદાય નમઃ ।

ॐ કૃષ્ણાષ્ટમીસમારબ્ધદિનસપ્તકસિદ્ધિદાય નમઃ ।

ॐ અર્કેન્દુગ્રહકાલીનજપાજ્ઝટિતિસિદ્ધિદાય નમઃ ।

ॐ નિશાત્રિકાલપૂજાકમાસેનૈકેનસિદ્ધિદાય નમઃ ।

ॐ મન્ત્રાર્ણૌષધિનિષ્પન્નગુટિકાભિઃસુસિદ્ધિદાય નમઃ ।

ॐ સૂર્યોદયસમારમ્ભદિનેનૈકેનસાધિતાય નમઃ ।

ॐ સહસ્રારામ્બુજારૂઢદેશિકસ્મૃતિસિદ્ધિદાય નમઃ ।

ॐ શિવોંહભાવનાસિદ્ધસર્વસિદ્ધિવિલાસકાય નમઃ । ૪૯૦

ॐ પરાકામકલાધ્યાનસિદ્ધીશ્વરત્વદાયકાય નમઃ ।

ॐ અકારાય નમઃ ।

ૐ અગ્રિયપૂજાકાય નમઃ ।

ૐ અમૃતાનન્દદાયકાય નમઃ ।

ૐ અનન્તાય નમઃ ।

ૐ અનન્તાવતારેષ્વનન્તફલદાયકાય નમઃ ।

ૐ અષ્ટાઙ્ગપાતસમ્પ્રીતાય નમઃ ।

ૐ અષ્ટવિધમૈથુનપ્રિયાય નમઃ ।

ૐ અષ્ટપુષ્પસમારાધ્યાય નમઃ ।

ૐ અષ્ટાધ્યાયીજ્ઞાનદાયકાય નમઃ । ૫૦૦

ૐ આરબ્ધકર્મનિર્વિઘ્નપૂરયિત્રે નમઃ ।

ૐ આક્ષપાટિકાય નમઃ ।

ૐ ઇન્દ્રગોપસમાનશ્રિયે નમઃ ।

ૐ ઇક્ષુભક્ષણલાલસાય નમઃ ।

ૐ ઈકારવર્ણસમ્બુદ્ધપરાકામકલાત્મકાય નમઃ ।

ૐ ઈશાનપુત્રાય નમઃ ।

ૐ ઈશાનાય નમઃ ।

ૐ ઈષણાત્રયમાર્જકાય નમઃ ।

ૐ ઉદ્દણ્ડાય નમઃ ।

ૐ ઉગ્રાય નમઃ । ૫૧૦

ૐ ઉદગ્રાય નમઃ ।

ૐ ઉણ્ડેરકબલિપ્રિયાય નમઃ ।

ૐ ઊર્જસ્વતે નમઃ ।

ૐ ઊષ્મલમદાય નમઃ ।

ૐ ઊહાપોહદુરાસદાય નમઃ ।

ૐ ઋજુચિત્તૈકસુલભાય નમઃ ।

ૐ ઋણત્રયવિમોચકાય નમઃ ।

ૐ ઋગર્થવેત્રે નમઃ ।

ૐ ૠકારાય નમઃ ।

ૐ ૠકારાક્ષરરૂપધૃજે નમઃ । ૫૨૦

ૐ ઌવર્ણરૂપાય નમઃ ।

ૐ ૡવર્ણાય નમઃ ।

ૐ ૡકારાક્ષરપૂજિતાય નમઃ ।

ૐ એધિતાખિલભક્તશ્રિયે નમઃ ।

ॐ એધિતાખિસંશ્રયાય નમઃ ।

ॐ એકારરૂપાય નમઃ ।

ॐ ઐકારાય નમઃ ।

ॐ ઐમ્પુટિતસ્મૃતિબિન્દુકાય નમઃ ।

ॐ ઓઙ્કારવાચ્યાય નમઃ ।

ॐ ઓઙ્કારાય નમઃ । ૫૩૦

ॐ ઓઙ્કારાક્ષરરૂપધૃજે નમઃ ।

ॐ ઔઙ્કારાઢ્યગભૂયુક્તાય નમઃ ।

ॐ ઔમ્પૂર્વયુગ્ગકારકાય નમઃ ।

ॐ અંશાંશિભાવસન્દૃષ્ટાય નમઃ ।

ॐ અંશાંશિભાવવિવર્જિતાય નમઃ ।

ॐ અઃકારાન્તસમસ્તાચ્કવર્ણમણ્ડલપૂજિતાય નમઃ ।

ॐ કતૃતીયવિસર્ગાઢ્યાય નમઃ ।

ॐ કતૃતીયાર્ણકેવલાય નમઃ ।

ॐ કર્પૂરતિલકોદ્ભાસિલલાટોર્ધ્વપ્રદેશકાય નમઃ ।

ॐ ખલ્વાટભૂમિસંરક્ષિણે નમઃ । ૫૪૦

ॐ ખલ્વાટબુદ્ધિભેષજાય નમઃ ।

ॐ ખટ્વાઙ્ગાયુધસંયુક્તાય નમઃ ।

ॐ ખડ્ગોદ્યતકરાન્વિતાય નમઃ ।

ॐ ખણ્ડિતાખિલદુર્ભિક્ષાય નમઃ ।

ॐ ખનિલક્ષ્મીપ્રદર્શકાય નમઃ ।

ॐ ખદિરાધિકસારાઢ્યાય નમઃ ।

ॐ ખલીકૃતવિપક્ષકાય નમઃ ।

ॐ ગાન્ધર્વવિદ્યાચતુરાય નમઃ ।

ॐ ગન્ધર્વનિકરપ્રિયાય નમઃ ।

ॐ ઘપૂર્વબીજસન્નિષ્ટાય નમઃ । ૫૫૦

ॐ ઘોરઘર્ઘરબૃંહિતાય નમઃ ।

ॐ ઘણ્ટાનિનાદસન્તુષ્ટાય નમઃ ।

ॐ ઘાર્ણાય નમઃ ।

ॐ ઘનાગમપ્રિયાય નમઃ ।

ॐ ચતુર્વેદેષુ સઙ્ગીતાય નમઃ ।

ॐ ચતુર્થવેદનિષ્ઠિતાય નમઃ ।

ॐ ચતુર્દશકસંયુક્તચતુર્યુક્તચતુશ્શતાય નમઃ ।
ॐ ચતુર્થીપૂજનપ્રીતાય નમઃ ।
ॐ ચતુરાત્મને નમઃ ।
ॐ ચતુર્ગતયે નમઃ । ૫૬૦
ॐ ચતુર્થીતિથિસમ્ભૂતાય નમઃ ।
ॐ ચતુર્વર્ગફલપ્રદાય નમઃ ।
ॐ છત્રિણે નમઃ ।
ॐ છદ્મને નમઃ ।
ॐ છલાય નમઃ ।
ॐ છન્દોવપુષે નમઃ ।
ॐ છન્દોવતારકાય નમઃ ।
ॐ જગદ્બન્ધવે નમઃ ।
ॐ જગન્માત્રે નમઃ ।
ॐ જગદ્રક્ષિણે નમઃ । ૫૭૦
ॐ જગન્મયાય નમઃ ।
ॐ જગદ્યોનયે નમઃ ।
ॐ જગદ્રૂપાય નમઃ ।
ॐ જગદાત્મને નમઃ ।
ॐ જગન્નિધયે નમઃ ।
ॐ જરામરણવિધ્વંસિને નમઃ ।
ॐ જગદાનન્દદાયકાય નમઃ ।
ॐ જાગુડાનુકૃતિચ્છાયાય નમઃ ।
ॐ જાગ્રદાદિપ્રકાશકાય નમઃ ।
ॐ જામ્બૂનદસમચ્છાયાય નમઃ । ૫૮૦
ॐ જપસમ્પ્રીતમાનસાય નમઃ ।
ॐ જપયોગસુસંવેદ્યાય નમઃ ।
ॐ જપતત્પરસિદ્ધિદાય નમઃ ।
ॐ જપાકુસુમસઙ્કાશાય નમઃ ।
ॐ જાતીપૂજકવાક્પ્રદાય નમઃ ।
ॐ જયન્તીદિનસુપ્રીતાય નમઃ ।
ॐ જયન્તીપૂજિતાઙ્ઘ્રિકાય નમઃ ।
ॐ જગદ્ભાનતિરસ્કારિણે નમઃ ।

ૐ જગદ્ભાનતિરોહિતાય નમઃ ।
ૐ જગદ્રૂપમહામાયાધિષ્ઠાનચિન્મયાત્મકાય નમઃ । ૫૯૦
ૐ ઝઞ્ઝાનિલસમશ્વાસિન નમઃ ।
ૐ ઝિલ્લિકાસમકાન્તિકાય નમઃ ।
ૐ ઝલઝ્ઝલાસુસંશોભિશૂર્પાકૃતિદ્વિકર્ણકાય નમઃ ।
ૐ ટઙ્કકર્મવિનાભાવસ્વયમ્ભૂતકલેવરાય નમઃ ।
ૐ ઠક્કુરાય નમઃ ।
ૐ ઠક્કુરારાધ્યાય નમઃ ।
ૐ ઠક્કુરાકૃતિશોભિતાય નમઃ ।
ૐ ડિણ્ડિમસ્વનસંવાદિને નમઃ ।
ૐ ડમરુપ્રિયપુત્રકાય નમઃ ।
ૐ ઢક્કાવાદનસન્તુષ્ટાય નમઃ । ૬૦૦
ૐ ઢુણ્ઢિરાજવિનાયકાય નમઃ ।
ૐ તુન્દિલાય નમઃ ।
ૐ તુન્દિલવપુષે નમઃ ।
ૐ તપનાય નમઃ ।
ૐ તાપરોષઘ્ને નમઃ ।
ૐ તારકબ્રહ્મસંસ્થાનાય નમઃ ।
ૐ તારાનાયકશેખરાય નમઃ ।
ૐ તારુણ્યાઢ્યવધૂસઙ્ગિને નમઃ ।
ૐ તત્ત્વવેત્રે નમઃ ।
ૐ ત્રિકાલવિદે નમઃ । ૬૧૦
ૐ સ્થૂલાય નમઃ ।
ૐ સ્થૂલકરાય નમઃ ।
ૐ સ્થેયાય નમઃ ।
ૐ સ્થિતિકર્ત્રે નમઃ ।
ૐ સ્થિતિપ્રદાય નમઃ ।
ૐ સ્થાણવે નમઃ ।
ૐ સ્થિરાય નમઃ ।
ૐ સ્થલેશાયિને નમઃ ।
ૐ સ્થાણ્ડિલકુલપૂજિતાય નમઃ ।
ૐ દુઃખહન્ત્રે નમઃ । ૬૨૦

ૐ દુઃખદાયિને નમઃ ।

ૐ દુર્ભિક્ષાદિવિનાશકાય નમઃ ।

ૐ ધનધાન્યપ્રદાય નમઃ ।

ૐ ધ્યેયાય નમઃ ।

ૐ ધ્યાનસ્તિમિતલોચનાય નમઃ ।

ૐ ધીરાય નમઃ ।

ૐ ધિયે નમઃ ।

ૐ ધીરધિયે નમઃ ।

ૐ ધુર્યાય નમઃ ।

ૐ ધુરીણત્વપ્રદાયકાય નમઃ । ૬૩૦

ૐ ધ્યાનયોગૈકસન્દૃષ્ટાય નમઃ ।

ૐ ધ્યાનયોગૈકલમ્પટાય નમઃ ।

ૐ નારાયણપ્રિયાય નમઃ ।

ૐ નમ્યાય નમઃ ।

ૐ નરનારીજનાશ્રયાય નમઃ ।

ૐ નગ્નપૂજનસન્તુષ્ટાય નમઃ ।

ૐ નગ્નનીલાસમાવૃતાય નમઃ ।

ૐ નિરઞ્જનાય નમઃ ।

ૐ નિરાધારાય નમઃ ।

ૐ નિર્લેપાય નમઃ । ૬૪૦

ૐ નિરવગ્રહાય નમઃ ।

ૐ નિશીથિનીનમસ્યાકાય નમઃ ।

ૐ નિશીથિનીજપપ્રિયાય નમઃ ।

ૐ નામપારાયણપ્રીતાય નમઃ ।

ૐ નામરૂપપ્રકાશકાય નમઃ ।

ૐ પુરાણપુરુષાય નમઃ ।

ૐ પ્રાતસ્સન્ધ્યારુણવપુઃપ્રભાય નમઃ ।

ૐ ફુલ્લપુષ્પસમૂહ શ્રીસમ્ભૂષિતસુમસ્તકાય નમઃ ।

ૐ ફાલ્ગુનાનુજપૂજાકાય નમઃ ।

ૐ ફેત્કારતન્ત્રવર્ણિતાય નમઃ । ૬૫૦

ૐ બ્રાહ્મણાદિસમારાધ્યાય નમઃ ।

ૐ બાલપૂજ્યાય નમઃ ।

ૐ બલપ્રદાય નમઃ ।
ૐ બાણાર્ચિતપદદ્વન્દ્વાય નમઃ ।
ૐ બાલકેલિકુતૂહલાય નમઃ ।
ૐ ભવાનીહૃદયાનન્દિને નમઃ ।
ૐ ભાવગમ્યાય નમઃ ।
ૐ ભવાત્મજાય નમઃ ।
ૐ ભવેશાય નમઃ ।
ૐ ભવ્યરૂપાઢ્યાય નમઃ । ૬૬૦
ૐ ભાર્ગવેશાય નમઃ ।
ૐ ભૃગોઃસુતાય નમઃ ।
ૐ ભવ્યાય નમઃ ।
ૐ ભવ્યકલાયુક્તાય નમઃ ।
ૐ ભાવનાવશતત્પરાય નમઃ ।
ૐ ભગવતે નમઃ ।
ૐ ભક્તિસુલભાય નમઃ ।
ૐ ભયહન્ત્રે નમઃ ।
ૐ ભયપ્રદાય નમઃ ।
ૐ માયાવિને નમઃ । ૬૭૦
ૐ માનદાય નમઃ ।
ૐ માનિને નમઃ ।
ૐ મનોભિમાનશોધકાય નમઃ ।
ૐ મહાહવોદ્યતક્રીડાય નમઃ ।
ૐ મન્દહાસમનોહરાય નમઃ ।
ૐ મનસ્વિને નમઃ ।
ૐ માનવિધ્વંસિને નમઃ ।
ૐ મદલાલસમાનસાય નમઃ ।
ૐ યશસ્વિને નમઃ ।
ૐ યશાશંસિને નમઃ । ૬૮૦
ૐ યાજ્ઞિકાય નમઃ ।
ૐ યાજ્ઞિકપ્રિયાય નમઃ ।
ૐ રાજરાજેશ્વરાય નમઃ ।
ૐ રાજ્ઞે નમઃ ।

ॐ રામાય નમઃ ।

ॐ રમણલમ્પટાય નમઃ ।

ॐ રસરાજસમાસ્વાદિને નમઃ ।

ॐ રસરાજૈકપૂજિતાય નમઃ ।

ॐ લક્ષ્મીવતે નમઃ ।

ॐ લક્ષ્મસમ્પન્નાય નમઃ । ૬૯૦

ॐ લક્ષ્યાય નમઃ ।

ॐ લક્ષણસંયુતાય નમઃ ।

ॐ લક્ષ્યલક્ષણભાવસ્થાય નમઃ ।

ॐ લયયોગવિભાવિતાય નમઃ ।

ॐ વીરાસનસમાસીનાય નમઃ ।

ॐ વીરવન્દ્યાય નમઃ ।

ॐ વરેણ્યદાય નમઃ ।

ॐ વિવિધાર્થજ્ઞાનદાત્રે નમઃ ।

ॐ વેદવેદાન્તવિત્તમાય નમઃ ।

ॐ શિખિવાહસમારૂઢાય નમઃ । ૭૦૦

ॐ શિખિવાહનનાથિતાય નમઃ ।

ॐ શ્રીવિદ્યોપાસનપ્રીતાય નમઃ ।

ॐ શ્રીવિદ્યામન્ત્રૈવિગ્રહાય નમઃ ।

ॐ ષડાધારક્રમપ્રીતાય નમઃ ।

ॐ ષડામ્નાયેષુ સંસ્થિતાય નમઃ ।

ॐ ષડ્દર્શનીપારદૃશ્વને નમઃ ।

ॐ ષડધ્વાતીતરૂપકાય નમઃ ।

ॐ ષડૂર્મિવૃન્દવિધ્વંસિને નમઃ ।

ॐ ષટ્કોણમધ્યબિન્દુગાય નમઃ ।

ॐ ષટ્ત્રિંશત્તત્ત્વસન્નિષ્ઠાય નમઃ । ૭૧૦

ॐ ષટ્કર્મસઙ્ઘસિદ્ધિદાય નમઃ ।

ॐ ષડ્વૈરિવર્ગવિધ્વંસિવિઘ્નેશ્વરગજાનનાય નમઃ ।

ॐ સત્તાજ્ઞાનાદિરૂપાઢ્યાય નમઃ ।

ॐ સાહસાદ્ભુતખેલનાય નમઃ ।

ॐ સર્પરૂપધરાય નમઃ ।

ॐ સંવિદે નમઃ ।

ॐ સંસારામ્બુધિતારકાય નમઃ ।

ॐ સર્પસઙ્ઘસમાશ્લિષ્ટાય નમઃ ।

ॐ સર્પકુણ્ડલિતોદરાય નમઃ ।

ॐ સપ્તવિંશતિઋક્પૂજ્યાય નમઃ । ૭૨૦

ॐ સ્વાહાયુઙ્મન્ત્રવિગ્રહાય નમઃ ।

ॐ સર્વકર્મસમારમ્ભસમ્પૂજિતપદદ્વયાય નમઃ ।

ॐ સ્વયમ્ભુવે નમઃ ।

ॐ સત્યસઙ્કલ્પાય નમઃ ।

ॐ સ્વયમ્પ્રકાશમૂર્તિકાય નમઃ ।

ॐ સ્વયન્ભૂલિઙ્ગસંસ્થાયિને નમઃ ।

ॐ સ્વયમ્ભૂલિઙ્ગપૂજિતાય નમઃ ।

ॐ હવ્યાય નમઃ ।

ॐ હુતપ્રિયાય નમઃ ।

ॐ હોત્રે નમઃ । ૭૩૦

ॐ હુતભુજે નમઃ ।

ॐ હવનપ્રિયાય નમઃ ।

ॐ હરલાલનસન્તુષ્ટાય નમઃ ।

ॐ હલાહલાશિપુત્રકાય નમઃ ।

ॐ હ્રીઙ્કારરૂપાય નમઃ ।

ॐ હુઙ્કારાય નમઃ ।

ॐ હાહાકારસમાકુલાય નમઃ ।

ॐ હિમાચલસુતાસૂનવે નમઃ ।

ॐ હેમભાસ્વરદેહકાય નમઃ ।

ॐ હિમાચલશિખારૂઢાય નમઃ । ૭૪૦

ॐ હિમધામસમદ્યુતયે નમઃ ।

ॐ ક્ષોભહન્ત્રે નમઃ ।

ॐ ક્ષુધાહન્ત્રે નમઃ ।

ॐ ક્ષૈણ્યહન્ત્રે નમઃ ।

ॐ ક્ષમાપ્રદાય નમઃ ।

ॐ ક્ષમાધારિણે નમઃ ।

ॐ ક્ષમાયુક્તાય નમઃ ।

ॐ ક્ષપાકરનિભાય નમઃ ।

ૐ ક્ષમિણે નમઃ ।
ૐ કકારાદિક્ષકારાન્તસર્વહલ્કપ્રપૂજિતાય નમઃ । ૭૫૦
ૐ અકારાદિક્ષકારાન્તવર્ણમાલાવિજૃમ્ભિતાય નમઃ ।
ૐ અકારાદિક્ષકારાન્તમહાસરસ્વતીમયાય નમઃ ।
ૐ સ્થૂલતમશરીરાઢ્યાય નમઃ ।
ૐ કારુકર્મવિજૃમ્ભિતાય નમઃ ।
ૐ સ્થૂલતરસ્વરૂપાઢ્યાય નમઃ ।
ૐ ચક્રજાલપ્રકાશિતાય નમઃ ।
ૐ સ્થૂલરૂપસમુજ્જૃમ્ભિણે નમઃ ।
ૐ હૃદબ્જધ્યાતરૂપકાય નમઃ ।
ૐ સૂક્ષ્મરૂપસમુલ્લાસિને નમઃ ।
ૐ મન્ત્રજાલસ્વરૂપકાય નમઃ । ૭૬૦
ૐ સૂક્ષ્મતરતનુશ્રીકાય નમઃ ।
ૐ કુણ્ડલિનીસ્વરૂપકાય નમઃ ।
ૐ સુક્ષ્મતમવપુશ્શોભિને નમઃ ।
ૐ પરાકામકલાતનવે નમઃ ।
ૐ પરરૂપસમુદ્ભાસિને નમઃ ।
ૐ સચ્ચિદાનન્દવિગ્રહાય નમઃ ।
ૐ પરાપરવપુર્ધારિણે નમઃ ।
ૐ સમરૂપવિલાસિતાય નમઃ ।
ૐ ષડામ્નાયમહામન્ત્રનિકુરુમ્બનિષેવિતાય નમઃ ।
ૐ તત્પુરુષમુખોત્પન્નપૂર્વામ્નાયમનુપ્રિયાય નમઃ । ૭૭૦
ૐ અઘોરમુખસઞ્જાતદક્ષિણામ્નાયપૂજિતાય નમઃ ।
ૐ સદ્યોજાતમુખોત્પન્નપશ્ચિમામ્નાયસેવિતાય નમઃ ।
ૐ વામદેવમુખોત્પન્નોત્તરામ્નાયપ્રપૂજિતાય નમઃ ।
ૐ ઈશાનમુખસઞ્જાતોર્ધ્વામ્નાયમનુસેવિતાય નમઃ ।
ૐ વિમર્શમુખસઞ્જાતાનુત્તરામ્નાયપૂજિતાય નમઃ ।
ૐ તોટકાચાર્યસન્દિષ્ટપૂર્વામ્નાયકમન્ત્રકાય નમઃ ।
ૐ સુરેશસમુપાદિષ્ટદક્ષિણામ્નાયમન્ત્રકાય નમઃ ।
ૐ પદ્મપાદસમાદિષ્ટપશ્ચિમામ્નાયમન્ત્રકાય નમઃ ।
ૐ હસ્તામલકસન્દિષ્ટોત્તરામ્નાયકમન્ત્રકાય નમઃ ।
ૐ શઙ્કરાચાર્યસન્દિષ્ટોર્ધ્વામ્નાયાખિલમન્ત્રકાય નમઃ । ૭૮૦

ॐ દક્ષિણામૂર્તિસન્દિષ્ટનુત્તરામ્નાયમન્ત્રકાય નમઃ ।
ॐ સહજાનન્દસન્દિષ્ટાનુત્તરામ્નાયમન્ત્રકાય નમઃ ।
ॐ પૂર્વામ્નાયકમન્ત્રૌઘૈઃસૃષ્ટિશક્તિપ્રકાશકાય નમઃ ।
ॐ દક્ષિણામ્નાયમન્ત્રૌઘૈઃસ્થિતિશક્તિપ્રકાશકાય નમઃ ।
ॐ પશ્ચિમામ્નાયમન્ત્રૌઘૈર્હૃતિશક્તિપ્રકાશકાય નમઃ ।
ॐ ઉત્તરામ્નાયમન્ત્રૌઘૈસ્તિરોધાનપ્રકાશકાય નમઃ ।
ॐ ઊર્ધ્વામ્નાયકમન્ત્રૌઘૈરનુગ્રહપ્રકાશકાય નમઃ ।
ॐ અનુત્તરગમન્ત્રૌઘૈઃસહજાનન્દલાસકાય નમઃ ।
ॐ સર્વામ્નાયકસન્દિષ્ટાનુસ્યૂતચિત્સુખાત્મકાય નમઃ ।
ॐ સૃષ્ટિકર્ત્રે નમઃ । ૭૯૦
ॐ બ્રહ્મરૂપાય નમઃ ।
ॐ ગોપ્ત્રે નમઃ ।
ॐ ગોવિન્દરૂપકાય નમઃ ।
ॐ સંહારકૃતે નમઃ ।
ॐ રુદ્રરૂપાય નમઃ ।
ॐ તિરોધાયકાય નમઃ ।
ॐ ઈશ્વરાય નમઃ ।
ॐ સદાશિવાય નમઃ ।
ॐ અનુગ્રહીત્રે નમઃ ।
ॐ પઞ્ચકૃત્યપરાયણાય નમઃ । ૮૦૦
ॐ અણિમાદિગુણાસ્પૃષ્ટાય નમઃ ।
ॐ નિર્ગુણાનન્દરૂપકાય નમઃ ।
ॐ સર્વાત્મભાવનારૂપાય નમઃ ।
ॐ સુખમાત્રાનુભાવકાય નમઃ ।
ॐ સ્વસ્વરૂપસુસંશોભિને નમઃ ।
ॐ તાટસ્થિકસ્વરૂપકાય નમઃ ।
ॐ ષડ્ગુણાય નમઃ ।
ॐ અખિલકલ્યાણગુણરાજિવિરાજિતાય નમઃ ।
ॐ યજ્ઞાગ્નિકુણ્ડસમ્ભૂતાય નમઃ ।
ॐ ક્ષીરસાગરમધ્યગાય નમઃ । ૮૧૦
ॐ ત્રિદશકારુનિષ્પન્નસ્વાનન્દભવનસ્થિતાય નમઃ ।
ॐ ઊરીકૃતેશપુત્રત્વાય નમઃ ।

ૐ નીલવાણીવિવાહિતાય નમઃ ।
ૐ નીલસરસ્વતીમન્ત્રજપતાત્પર્યસિદ્ધિદાય નમઃ ।
ૐ વિદ્યાવદસુરધ્વંસિને નમઃ ।
ૐ સુરરક્ષાસમુદ્યતાય નમઃ ।
ૐ ચિન્તામણિક્ષેત્રવાસિને નમઃ ।
ૐ ચિન્તિતાખિલપૂરકાય નમઃ ।
ૐ મહાપાપૌઘવિધ્વંસિને નમઃ ।
ૐ દેવેન્દ્રકૃતપૂજનાય નમઃ । ૮૨૦
ૐ તારારમ્ભિણે નમઃ ।
ૐ નમોયુક્તાય નમઃ ।
ૐ ભગવત્પદઙેન્તગાય નમઃ ।
ૐ એકદંષ્ટ્રાયસંયુક્તાય નમઃ ।
ૐ હસ્તિમુખાયસંયુતાય નમઃ ।
ૐ લમ્બોદરચતુર્થ્યન્તવિરાજિતકલેવરાય નમઃ ।
ૐ ઉચ્છિષ્ટપદસંરાજિને નમઃ ।
ૐ મહાત્મનેપદપ્રિયાય નમઃ ।
ૐ આઙ્ક્રોંહ્રીઙ્ગંસમાયુક્તાય નમઃ ।
ૐ ઘેઘેસ્વાહાસમાપિતાય નમઃ । ૮૩૦
ૐ તારારબ્ધમહામન્ત્રાય નમઃ ।
ૐ હસ્તિમુખાન્તઙેયુતાય નમઃ ।
ૐ લમ્બોદરાયસંયુક્તાય નમઃ ।
ૐ ઙેન્તોચ્છિષ્ટમહાત્મયુજે નમઃ ।
ૐ પાશાઙ્કુશત્રપામારાય નમઃ ।
ૐ હૃલ્લેખાસમલઙ્કૃતાય નમઃ ।
ૐ વર્મઘેઘેસમારૂઢાય નમઃ ।
ૐ ઉચ્છિષ્ટાયપદોપધાય નમઃ ।
ૐ વહ્નિજાયાસુસમ્પૂર્ણાય નમઃ ।
ૐ મન્ત્રરાજદ્વયાન્વિતાય નમઃ । ૮૪૦
ૐ હેરમ્બાખ્યગણેશાનાય નમઃ ।
ૐ લક્ષ્મીયુતગજાનનાય નમઃ ।
ૐ તારુણ્યેશાય નમઃ ।
ૐ બાલરૂપિણે નમઃ ।

ૐ શક્તીશાય નમઃ ।
ૐ વીરનામકાય નમઃ ।
ૐ ઊર્ધ્વસમાખ્યાય નમઃ ।
ૐ ઉચ્છિષ્ટાય નમઃ ।
ૐ વિજયાય નમઃ ।
ૐ નૃત્યકર્મકાય નમઃ । ૮૫૦
ૐ વિઘ્નવિધ્વંસિવિઘ્નેશાય નમઃ ।
ૐ દ્વિજપૂર્વગણાધિપાય નમઃ ।
ૐ ક્ષિપ્રેશાય નમઃ ।
ૐ વલ્લભાજાનયે નમઃ ।
ૐ ભક્તીશાય નમઃ ।
ૐ સિદ્ધિનાયકાય નમઃ ।
ૐ દ્વ્યષ્ટાવતારસમ્ભિન્નલીલાવૈવિધ્યશોભિતાય નમઃ ।
ૐ દ્વાત્રિંશદવતારાઢ્યાય નમઃ ।
ૐ દ્વાત્રિંશદ્દીક્ષણક્રમાય નમઃ ।
ૐ શુદ્ધવિદ્યાસમારબ્ધમહાષોડશિકાન્તિમાય નમઃ । ૮૬૦
ૐ મહત્પદસમાયુક્તપાદુકાસમ્પ્રતિષ્ઠિતાય નમઃ ।
ૐ પ્રણવાદયે નમઃ ।
ૐ ત્રિતારીયુજે નમઃ ।
ૐ બાલાબીજકશોભિતાય નમઃ ।
ૐ વાણીભૂબીજસંયુક્તાય નમઃ ।
ૐ હંસત્રયસમન્વિતાય નમઃ ।
ૐ ખેચરીબીજસમ્ભિન્નાય નમઃ ।
ૐ નવનાથસુશોભિતાય નમઃ ।
ૐ પ્રાસાદશ્રીસમાયુક્તાય નમઃ ।
ૐ નવનાથવિલોમકાય નમઃ । ૮૭૦
ૐ પરાપ્રાસાદબીજાઢ્યાય નમઃ ।
ૐ મહાગણેશમન્ત્રકાય નમઃ ।
ૐ બાલાક્રમોત્ક્રમપ્રીતાય નમઃ ।
ૐ યોગબાલાવિજૃમ્ભિતાય નમઃ ।
ૐ અન્નપૂર્ણાસમાયુક્તાય નમઃ ।
ૐ વાજિવાહાવિલાસિતાય નમઃ ।

ૐ સૌભાગ્યપૂર્વવિદ્યાયુજે નમઃ ।
ૐ રમાદિષોડશીયુતાય નમઃ ।
ૐ ઉચ્છિષ્ટપૂર્વચાણ્ડાલીસમાયુક્તસુવિગ્રહાય નમઃ ।
ૐ ત્રયોદશાર્ણવાગ્દેવીસમુલ્લસિતમૂર્તિકાય નમઃ । ૮૮૦
ૐ નકુલીમાતૃસંયુક્તાય નમઃ ।
ૐ મહામાતઙ્ગિનીયુતાય નમઃ ।
ૐ લઘુવાર્તાલિકાયુક્તાય નમઃ ।
ૐ સ્વપ્નવાર્તાલિકાન્વિતાય નમઃ ।
ૐ તિરસ્કારીસમાયુક્તાય નમઃ ।
ૐ મહાવાર્તાલિકાયુક્તાય નમઃ ।
ૐ પરાબીજસમાયુક્તાય નમઃ ।
ૐ લોપામુદ્રાવિજૃમ્ભિતાય નમઃ ।
ૐ ત્રયોદશાક્ષરીહાદિજ્ઞપ્તિવિદ્યાસમન્વિતાય નમઃ ।
ૐ મહાવાક્યમહામાતૃચતુષ્ટયવિલાસિતાય નમઃ । ૮૯૦
ૐ બ્રહ્મણ્યરસબીજાઢ્યબ્રહ્મણ્યદ્વયશોભિતાય નમઃ ।
ૐ સપ્તદશાક્ષરીશૈવતત્ત્વવિમર્શિનીયુતાય નમઃ ।
ૐ ચતુર્વિંશતિવર્ણાત્મદક્ષિણામૂર્તિશોભિતાય નમઃ ।
ૐ રદનાક્ષરસંશોભિગણપોચ્છિષ્ટમન્ત્રકાય નમઃ ।
ૐ ગિરિવ્યાહૃતિવર્ણાત્મગણપોચ્છિષ્ટરાજકાય નમઃ ।
ૐ હંસત્રયસમારૂઢાય નમઃ ।
ૐ રસાવાણીસમર્પિતાય નમઃ ।
ૐ શ્રીવિદ્યાનન્દનાથાઢ્યાય નમઃ ।
ૐ આત્મકપદસંયુતાય નમઃ ।
ૐ શ્રીચર્યાનન્દનાથાઢ્યાય નમઃ । ૯૦૦
ૐ શ્રીમહાપાદુકાશ્રિતાય નમઃ ।
ૐ પૂજયામિપદપ્રીતાય નમઃ ।
ૐ નમઃપદસમાપિતાય નમઃ ।
ૐ ગુરુમુખૈકસંવેદ્યાય નમઃ ।
ૐ ગુરુમણ્ડલપૂજિતાય નમઃ ।
ૐ દીક્ષાગુરુસમારબ્ધશિવાન્તગુરુસેવિતાય નમઃ ।
ૐ ગુરુભિઃકુલરૂપિભિઃસમારાધ્યપદદ્વન્દ્વાય નમઃ ।
ૐ વિદ્યાવતારગુરુભિઃસમ્પૂજિતપદદ્વયાય નમઃ ।

ૐ પરૌઘીયગુરુપ્રીતાય નમઃ ।
ૐ દિવ્યૌઘગુરુપૂજિતાય નમઃ । ૯૧૦
ૐ સિદ્ધૌઘદેશિકારાધ્યાય નમઃ ।
ૐ માનવૌઘનિષેવિતાય નમઃ ।
ૐ ગુરુત્રયસમારાધ્યાય નમઃ ।
ૐ ગુરુષટ્કપ્રપૂજિતાય નમઃ ।
ૐ શામ્ભવીક્રમસમ્પૂજ્યાય નમઃ ।
ૐ અશીત્યુત્તરશતાર્ચિતાય નમઃ ।
ૐ ક્ષિત્યાદિરશ્મિસન્નિષ્ઠાય નમઃ ।
ૐ લઙ્ઘિતાખિલરશ્મિકાય નમઃ ।
ૐ ષડન્વયક્રમારાધ્યાય નમઃ ।
ૐ દેશિકાન્વયરક્ષિતાય નમઃ । ૯૨૦
ૐ સર્વશ્રુતિશિરોનિષ્ઠપાદુકાદ્વયવૈભવાય નમઃ ।
ૐ પરાકામકલારૂપાય નમઃ ।
ૐ શિવોહમ્ભાવનાત્મકાય નમઃ ।
ૐ ચિચ્છક્ત્યારવ્યપરાહંયુજે નમઃ ।
ૐ સર્વજ્ઞાનિસ્વરૂપકાય નમઃ ।
ૐ સંવિદ્બિન્દુસમાખ્યાતાય નમઃ ।
ૐ અપરાકામકલામયાય નમઃ ।
ૐ માયાવિશિષ્ટસર્વેશાય નમઃ ।
ૐ મહાબિન્દુસ્વરૂપકાય નમઃ ।
ૐ અણિમાદિગુણોપતાય નમઃ । ૯૩૦
ૐ સર્જનાદિક્રિયાન્વિતાય નમઃ ।
ૐ માયાવિશિષ્ટચૈતન્યાય નમઃ ।
ૐ અગણ્યરૂપવિલાસકાય નમઃ ।
ૐ મિશ્રકામકલારૂપાય નમઃ ।
ૐ અગ્નીષોમીયસ્વરૂપકાય નમઃ ।
ૐ મિશ્રબિન્દુસમાખ્યાકાય નમઃ ।
ૐ જીવવૃન્દસમાશ્રિતાય નમઃ ।
ૐ કામકલાત્રયાવિષ્ટાય નમઃ ।
ૐ બિન્દુત્રયવિલાસિતાય નમઃ ।
ૐ કામકલાત્રયધ્યાનસર્વબન્ધવિમોચકાય નમઃ । ૯૪૦

ૐ બિન્દુત્રયૈકતાધ્યાનવિકલેવરમુક્તિદાય નમઃ ।
ૐ મહાયજનસમ્પ્રીતાય નમઃ ।
ૐ વીરચર્યાધરપ્રિયાય નમઃ ।
ૐ અન્તર્યાગક્રમારાધ્યાય નમઃ ।
ૐ બહિર્યાગપુરસ્કૃતાય નમઃ ।
ૐ આત્મયાગસમારાધ્યાય નમઃ ।
ૐ સર્વવિશ્વનિયામકાય નમઃ ।
ૐ માતૃકાદશકન્યાસદેવતાભાવસિદ્ધિદાય નમઃ ।
ૐ પ્રપઞ્ચયાગન્યાસેનસર્વેશ્વરત્વદાયકાય નમઃ ।
ૐ લઘુષોઢામહાષોઢાન્યાસદ્વયસમર્ચિતાય નમઃ । ૯૫૦
ૐ શ્રીચક્રત્રિવિધન્યાસમહાસિદ્ધિવિધાયકાય નમઃ ।
ૐ રશ્મિમાલામહાન્યાસવજ્રવર્મસ્વરૂપકાય નમઃ ।
ૐ હંસપરમહંસાખ્યન્યાસદ્વયવિભાવિતાય નમઃ ।
ૐ મહાપદાવનીન્યાસકલાશતાધિકાષ્ટકાય નમઃ ।
ૐ ત્રિપુરાપૂજનપ્રીતાય નમઃ ।
ૐ ત્રિપુરાપૂજકપ્રિયાય નમઃ ।
ૐ નવાવૃતિમહાયજ્ઞસંરક્ષણધુરન્ધરાય નમઃ ।
ૐ લમ્બોદરમહારૂપાય નમઃ ।
ૐ ભૈરવીભૈરવાત્મકાય નમઃ ।
ૐ ઉત્કૃષ્ટશિષ્ટસદ્વસ્તુને નમઃ । ૯૬૦
ૐ પરસંવિત્તિરૂપકાય નમઃ ।
ૐ શુભાશુભકરાય કર્મણે નમઃ ।
ૐ જીવયાત્રાવિધાયકાય નમઃ ।
ૐ સતે નમઃ ।
ૐ ચિતે નમઃ ।
ૐ સુખાય નમઃ ।
ૐ નામ્ને નમઃ ।
ૐ રૂપાય નમઃ ।
ૐ અધિષ્ઠાનાત્મકાય નમઃ ।
ૐ પરાય (પરસ્મૈ) નમઃ । ૯૭૦
ૐ આરોપિતજગજ્જાતાય નમઃ ।
ૐ મિથ્યાજ્ઞાનાય નમઃ ।

ॐ અમઙ્ગલાય નમઃ ।
ॐ અકારાદિક્ષકારાન્તાય નમઃ ।
ॐ શબ્દસૃષ્ટિસ્વરૂપાય નમઃ ।
ॐ પરાયૈ વાચે નમઃ ।
ॐ વિમર્શરૂપિણે નમઃ ।
ॐ પશ્યન્ત્યૈ નમઃ ।
ॐ સ્ફોટરૂપધૃતે નમઃ ।
ॐ મધ્યમાયૈ નમઃ । ૯૮૦
ॐ ચિન્તનારૂપાય નમઃ ।
ॐ વૈખર્યૈ નમઃ ।
ॐ સ્થૂલવાચકાય નમઃ ।
ॐ ધ્વનિરૂપાય નમઃ ।
ॐ વર્ણરૂપિણે નમઃ ।
ॐ સર્વભાષાત્મકાય નમઃ ।
ॐ અપરાય (અપરસ્મૈ) નમઃ ।
ॐ મૂલાધારગતાય નમઃ ।
ॐ સુપ્તાય નમઃ ।
ॐ સ્વાધિષ્ઠાને પ્રપૂજિતાય નમઃ । ૯૯૦
ॐ મણિપૂરકમધ્યસ્થાય નમઃ ।
ॐ અનાહતામ્બુજમધ્યગાય નમઃ ।
ॐ વિશુદ્ધિપઙ્કજોલ્લાસાય નમઃ ।
ॐ આજ્ઞાચક્રાબ્જવાસકાય નમઃ ।
ॐ સહસ્રારામ્બુજારૂઢાય નમઃ ।
ॐ શિવશક્ત્યૈક્યરૂપકાય નમઃ ।
ॐ મૂલકુણ્ડલિનીરૂપાય નમઃ ।
ॐ મહાકુણ્ડલિનીમયાય નમઃ ।
ॐ ષોડશાન્તમહાસ્થાનાય નમઃ ।
ॐ અસ્પર્શાભિધમહાસ્થિત્યૈ નમઃ । ૧૦૦૦

ઇતિ ઉડ્ડામરેશ્વરતન્ત્રે ક્ષિપ્રપ્રસાદનપટલે
ગુહ્યનામ ઉચ્છિષ્ટગણેશસહસ્રનામાવલિઃ સમ્પૂર્ણા ।

The text is not a conventional one and is supportive of higher
level established Tantric practices.  It is not meant for
commonly devotional chanting.  User dicretion is recommended.

Proofread by krishna vallapareddy krishna321 at hotmail.com

*shrIguhyanAmauchChiShTagaNeshAnasahasranAmAvaliH*
pdf was typeset on September 24, 2023

Please send corrections to *sanskrit@cheerful.com*